# रघुवंशस्य समासानां विस्तृतमध्ययनम्

(raghuvaṃśasya samāsānāṃ vistṛtamadhyayanam)

## A Detailed Study of Compounds in Raghuvaṃśam

रामकृष्ण-मिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य

**संस्कृते पि.एच्.डि. (Ph.D)**

इत्युपाधिप्राप्त्यै समर्प्यमाणः शोधप्रबन्धः


**अनुसन्धाता - तुहिनमण्डलः**

अनुक्रमाङ्कः - B2050009

शोधच्छात्रः, संस्कृतदर्शनविभागे

रामकृष्ण-मिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य

**मार्गदर्शकः - डॉ. राकेशदाशः**

अध्यापकः, संस्कृतदर्शनविभागे

रामकृष्ण-मिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य



रामकृष्ण-मिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानम्

(मानितविश्वविद्यालयः)

बेलुडमठः, हाओडा - ७११२०२

शिक्षावर्षम् - २०२०-२०२२

# रघुवंशस्य समासानां विस्तृतमध्ययनम्


**शोधसारः-**

महाकविकालिदासस्य निरवद्या साहित्यकृतिः रघुवंशम् इति महाकाव्यम्। अस्मिन् महाकाव्ये महाकविना कालिदासेन उपमाद्यलङ्कारैः ललितपदविन्यासैः सरसतया रघुवंशीयनृपाणां वंशवर्णना विहिता। ऊनविंशतिसर्गात्मकेऽस्मिन् काव्ये ऊनसप्तत्यधिकपञ्चदशशतं श्लोकाः राजन्ते। सरसतया काव्योपजीव्यवर्णनाय महाकविना प्रायः प्रत्येकं श्लोके समासवृत्तिः आश्रिता। समग्रे रघुवंशमहाकाव्ये यानि समस्तपदानि कालिदासेन प्रयुक्तानि, तत्र ये समासाः व्यवहृताः तान् आश्रित्य एकम् अध्ययनं विहितम्। रघुवंशस्य समासानां विस्तृतमध्ययनम् इत्यस्ति शोधविषयः।

बहवः टीकाकारास्तु समासानां पर्यालोचनं कृतवन्तः, परन्तु टीकाकारैः कुत्रचित् समासानाम् उल्लेखः कृतः कुत्रचित् दिङ्मात्रं प्रदर्शितम्, कुत्रचित् त्यक्तम्। अत्र अस्माभिः समेषामपि समासानां परिशीलनम् क्रियते।

ननु अस्य शोधकार्यस्य फलं किम् इति चेत् अद्यत्वे E-learning अथवा स्वयंशिक्षणादिक्रमे अस्य कार्यस्य सुमहान् उपयोगः भवति। आधुनिककाले प्रायः सर्वेष्वपि क्षेत्रेषु सङ्गणकस्य उपयोगः दृश्यते। सङ्गणकस्य उपयोगेन शिक्षणपद्धतिरपि आमूलचूडं परिवर्तिता। सामान्येन सङ्गणकद्वारा समासविश्लेषणस्य प्रयासः बहुभ्यः वर्षेभ्यः प्रचलन् अस्ति। परन्तु तत्र सफलता अल्पशः एव लब्धा। एतेन अध्ययनेन च समासस्य भाषाशास्त्रीयाध्ययनाय corpus सज्जीकृतं भवति। तेन यान्त्रिकविश्लेषणाय तन्त्रनिर्माणे अपि लाभः स्यात्।

समासानां सन्ति नैके प्रभेदाः, केचन समासाः तु निपातनसिद्धाः। काव्यादिषु कुत्रचित् आर्षप्रयोगाः अपि लभ्यन्ते। अतः यन्त्रद्वारा समासविश्लेषणाय आदौ काव्यादिषु प्रयुक्तसमासानां बहुशः गभीरम् अध्ययनं करणीयम्। समासवृत्तेः भाषाशास्त्रदृष्ट्या विशदाध्ययनाय ईदृशस्य अध्ययनस्य विशिष्टः उपयोगः भवति। इदमेव लक्ष्यीकृत्य मदीयं शोधकार्यमिदं प्रवर्तते।

ननु समासविषये एव कथम् अध्ययनं क्रियते इति चेत्, कृत्तद्धितसमासैकशेषसनाद्यन्ताधातवः पञ्च वृत्तयः सन्ति। एतेषु सर्वापेक्षया अधिकं व्यवहारः भवति समासवृत्तेः। अतः काव्यादीनाम् अवबोधनाय समासवृत्तिविषये सम्यकं ज्ञानम् अपेक्षते। भाषायामपि इतरवृत्त्यपेक्षया समासवृत्तेः प्रयोगः बाहुल्येन क्रियते। अतः अयं विषयः शोधविषयत्वेन स्वीकृतः।

रघुवंशकाव्ये समस्तपदानि सन्ति प्रायः पञ्चसहस्रम्। तेषु समासाः सन्ति प्रायः षट्सहस्रम्। तेषु तत्पुरुषसमासस्य प्रयोगः सर्वापेक्षया अधिकः। प्रायः चतुःसहस्रम्। ततः परम् अस्ति वहुब्रीहिसमासस्य प्रयोगः। प्रायः सार्धैकशतम्। न्यूनतमः अस्ति द्विगुसमासः। द्विगुसमासस्य संख्या प्रायः एकादश। एतेषु समासेषु कुत्र कः प्रभेदः अस्ति, केन सूत्रेण वार्तिकेन वा समासः विहितः, समस्तपदानां लौकिकम् अलौकिकं च विग्रहवाक्यं इत्यादिविषयाः उक्ताः। विशेषस्थलेषु प्रक्रिया अपि प्रदर्शिता। समासनिर्णये विग्रहवाक्यनिर्णये च सन्देहास्पदस्थलेषु सयुक्ति युक्ततरपक्षः आश्रितः। कुत्र असमर्थसमासः अस्ति, कुत्र नित्यसमासः अस्ति, समासान्तप्रत्ययः कः अस्ति इत्येते विषयाः अस्मिन् शोधप्रबन्धे आलोचिताः।

शोधप्रबन्धेऽस्मिन् पञ्च अध्यायाः कल्पिताः। आदौ प्रबन्धस्यास्य उपोद्घातः लिखितः। अन्तिमे च उपसंहारः लिखितः। मध्ये अध्यायक्रमः एवं विद्यते-

प्रथमः अध्यायः- केवलसमासः।

द्वितीयः अध्यायः- अव्ययीभावः, द्वन्द्वः, एकशेषः।

तृतीयः अध्यायः- तत्पुरुषः।

चतुर्थः अध्यायः- कर्मधारयः, द्विगुः।

पञ्चमः अध्यायः- बहुव्रीहिः।

ततः चत्वारि परिशिष्टानि योजितानि। प्रथमे परिशिष्टे समासभेदाः उक्ताः। द्वितीये परिशिष्टे रघुवंशे समासानां परिसङ्ख्यानम् लिखितम्। तृतीये परिशिष्टे रघुवंशे समस्तपदानां समासाः लिखिताः। चतुर्थे परिशिष्टे आश्रितग्रन्थसूची लिखिता।

एवञ्च यथामति अयं शोधप्रबन्धः प्रस्तुतः।